श्री वामन स्तोत्रं

श्री वामन स्तोत्रं

अदितिरुवाच |
यज्ञेश यज्ञपुरुषाच्युत तीर्थपाद
तीर्थश्रवः श्रवण मंगळनामधेय |
आपन्नलोकवृजिनोपशमोदयाद्य
शं नः कृधीश भगवन्नसि दीननाथः || 1 ||

विश्वाय विश्वभवनस्थितिसंयमाय
स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने |
स्वस्थाय शश्वदुपबृंहितवूर्णबोध-
-व्यापादितात्मतमसे हरये नमस्ते || 2 ||

आयुः परं वपुरभीष्टमतुल्यलक्ष्मी-
-र्द्यौभूरसाः सकलयोगगुणास्त्रिवर्गः |
ज्ञानं च केवलमनंत भवंति तुष्टात्
त्वत्तो नृणां किमु सपत्नजयादिराशीः || 3 ||

इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे सप्तदशोऽध्याये श्री वामन स्तोत्रं |